"अवध्याश्च स्त्रियं प्राहुस्तिर्य्यग्योनिगतास्वपि ।"
पशुस्त्रीणामवध्यत्वमाह मत्स्यपुराणे ।
"किं त्वया न श्रुतं लोके अवध्याः पशुयोषितः" ।
इति प्रायश्चित्ततत्त्वं ॥*॥ आत्मन अवध्यत्वं यथा,—
"देही नित्यमवध्योऽयं देहे सर्व्वस्य भारत ।
तस्मात् सर्व्वाणि भूतानि न त्वं शोचितुमर्हसि" ॥
इति श्रीभगवद्गीतायां २ अध्यायः ॥ * ॥ तद्वधे पापं यथा,—
"यावानवध्यस्य वधे तावान् वध्यस्य मोक्षणे ।
अधर्म्मो नृपतेर्दृष्टो धर्म्मस्तु विनियच्छतः" ॥
इति मानवे ९ अध्याये २४९ श्लोकः ॥

अवध्वंसः, पुं, (अव + ध्वन्स + घञ् ।) परित्यागः । निन्दनं । अवचूर्णनं । इति मेदिनी ॥

अवध्वस्तः, त्रि, (अव + ध्वन्स + क्त ।) परित्यक्तः । निन्दितः । अवचूर्णितः । इति मेदिनी ॥

अवनं, क्ली, (अव + ल्युट् ।) प्रीणनं । इत्यमरः ॥ रक्षणं । इति हेमचन्द्रः ॥ गमनं । स्पृहा । तर्पणं । शोभनं । श्रवणं । प्राप्तिः । आलिङ्गनं । याचनं । प्रवेशनं । सत्ता । वृद्धिः । ग्रहणं । वधः । शक्तिः । अवगमनं । कामः । करणं । एते अवधात्वर्थाः ॥

अवनतं, त्रि, (अव + नम् + क्त ) नम्रं । नतभागः । नोया इति भाषा । तत्पर्य्यायः । अवाग्रं २ आनतं ३ नतं ४ । इत्यमरः तट्टीका च ॥ (अधोभूतः । "लिखन्नास्ते भूमिं वहिरवनतः प्राणदयितः" । इति अमरुशतके ।)

अवनद्धं, क्ली, (अव + नह् + क्त ।) आनद्धं । मृदङ्गादिवाद्यं । इत्यमरटीकायां स्वामी ॥ (आबद्धः । आच्छादितः । यथाह मनुः,—
"चर्म्मावनद्धं दुर्गन्धि पूर्णं मूत्रपुरीषयोः ।"
लिप्तः यथा, "स्त्यानावनद्धघनशोणितशोणपाणिरुत्तंसयिष्यति कचांस्तव देवि भीमः ।" इति वेणीसंहारनाटकम् ।)

अवनयः, पुं, (अव + नी + भावे अच् ।) अवनायः । निपातनं । अधःपातनं । इति भरतः ॥

अवनाटः, त्रि, (अवनता नासिका, प्रादिसमासः, नतार्थे नासिकाया नाटादेशः अर्श आद्यच् ।) नतनासिकः । खाँदा छेपड़ानाकव्यक्ति इति भाषा । तत्पर्य्यायः । अवटीटः २ अवभ्रटः ३ । इत्यमरः ॥

अवनायः, पुं, (अव + नी + घञ् ।) अवनयः । अधोनयनं । इत्यमरः ॥ नीचे फेलान इति भाषा ।

अवनिः, स्त्री, (अव + अनि ।) पृथिवी । इत्यमरः ॥ ("तामुन्निद्रामवनिशयनां सौधवातायनस्थः" । इति मेघदूते ।)

अवनी, स्त्री, (अव + अनि + ङीप् ।) पृथ्वी । इति भरतः ॥ त्रायमाणा लता । इति राजनिर्घण्टः ॥

अवनीपतिः, पुं, (अवन्याः पतिः, षष्ठीतत्पुरुषः ।) राजा । इति जटाधरः ॥
("स श्रवा सुमहाभागः शोतिमानवनीपतौ" । इति मत्स्यपुराणे ।)

अवनेजनं, क्ली, (अव + निज् + ल्युट् ।) पिण्डदानार्थं मातृतकुशोपरि जलसेचनं यथा ब्रह्मपुराणम्,—
"सपुष्पं जलमादाय तेषां पृष्ठे पृथक् पृथक् ।
अपदक्षिणं नेनिज्यात् गोत्रनामानुमन्त्रितं ॥
पितुरवनेजनं मूलदेशे पितामहप्रपितामहयोस्तु अवनेजनं मध्यदेशाग्रदेशयोः । मातामहादीनामप्येवं । इति । पिण्डोपरि जलसेचनं । यथा ब्रह्मपुराणं,—
"ततो दर्भेषु विधिवत् सम्मार्ज्य च करन्ततः ।
प्रक्षाल्य च जलेनाथ चिराचम्य हरिं स्मरेत् ।
"तेभ्यः संस्रवपात्रेभ्यो जलेनैवावनेजनं ।
दत्त्वाथ पितरश्चेति पठेच्चोदङ्मुखस्थितः" ॥
इति च श्राद्धतत्त्वं ॥ (प्रक्षालनं ।
"न कुर्य्यात् गुरुपुत्रस्य पादयोश्चावनेजनम्" ।
इति मनुः ।)

अवन्तिः, पुं, (अव + झिच् ।) अवन्तीदेशः । इति हेमचन्द्रः ॥ नदीविशेषः ! इत्युणादिकोषः । यथा,
"प्राग्ज्योतिषाः कामरूपा मालवाः स्युरवन्तयः" ।
इति हेमचन्द्रः ॥ अपि च ।
"अनूपास्तुण्डिकेराश्च वीतिहोत्रा अवन्तयः ।
एते जनपदाः ख्याता विन्ध्यपृष्ठनिवासिनः" ॥
इति मत्स्यपुराणे ९५ अध्यायः ॥

अवन्तिका, स्त्री, (अवति अव रक्षणादौ, बाहुलकात् झिच ततः स्वार्थे कन्, टाप् ।) उज्जयनीनगरी ।
"अयोध्या मथुरा माया काशी काञ्ची अवन्तिका ।
पुरी द्वारवती चैव सप्तैता मोक्षदायिकाः" ॥
इति स्कन्दपुराणे ॥

अवन्तिसोमं, क्ली, (अवन्तिषु अभिषुतं सोमं, शाकपार्थिवादित्वात् समासः ।) काञ्जिकं । इत्यमरसिंहः ॥ काँजि इति भाषा । (काञ्जिकशब्देऽस्य गुणा व्याख्येयाः ।)

अवन्ती, स्त्री, मालवदेशस्य नगरी । उजेन इति ख्याता । तत्पर्य्यायः । उज्जयिनी २ विशाला ३ पुष्पकरण्डिनी ४ । इति हेमचन्द्रः ॥ यथा,—
"ताम्रपर्णीं समासाद्य शैलाद्रशिखरोद्धतः ।
अवन्तीसंज्ञको देशः कालिका तत्र तिष्ठति" ॥
इति शक्तिसङ्गमतन्त्रे ७ पटलः ॥ अन्यच्च ।
"उत्पन्नोऽर्कः कलिङ्गे तु यमुनायाञ्च चन्द्रमाः ।
अवन्त्याञ्च कुजो जातो मागधे च हिमांशुजः" ॥
इति संस्कारतत्त्वधृतमत्स्यपुराणं ॥ अन्यत् पूर्व्वलिखितं । ("प्राप्यावन्तीमुदयनकथाकोविदग्रामवृद्धान् ।" इति मेघदूते ।)

अवन्ध्यः, त्रि, (वन्धे साधुरिति वन्ध्यः, वन्ध + यत्, ततो नञ्समासः ।) फलवान् । फलकाले फलयुक्तवृक्षः । तत्पर्य्यायः । फलेग्रहिः २ फलग्रहिः ३ । इत्यमरः ॥
("कर्त्तुं यच्च प्रभवति महीमुच्छिलीन्ध्रामवन्ध्याम्" । इति मेघदूते ।)

अवपातः, पुं, (अव + पत् + घञ् ।) रन्ध्रं । गर्त्तः । इति हेमचन्द्रः ॥ अधःपतनं ॥ (गजादीनां ग्रहणार्थं छन्नतृणादिना प्रच्छन्नो गर्त्तः । यथा,—
"अवपातस्तु हस्त्यर्थे गर्त्तश्छन्नस्तृणादिना" ।
इति यादवः ।
"रोधांसि निघ्नन्नवपातमग्नः
करीव वन्यः परुषं ररास" ।
इति रघुवंशे । नाटकादौ भयादिजनितपलायनसम्भ्रमादिवर्णनेन प्रस्तुतस्य परिवर्त्तः । यथा,—
"अवपातस्तु निष्क्राम-प्रवेश-त्रास-विद्रवैः" ।
इति दशरूपे ।)

अवभृथः, पुं, (अवभ्रियते अनेन, अव + भृ + कथन् ।) दीक्षान्तयज्ञः । प्रधानयागसमापकापरयज्ञः । यज्ञादेर्न्यूनाधिक-दोष-शान्ति-निमित्तक-शेष-कर्त्तव्य-होम इति यावत् ॥ इत्यमरः तट्टीका च ॥ यज्ञावशेषस्नानं । इति भरतः त्रिकाण्डशेषश्च ॥
("ततश्चकारावभृथं विधिदृष्टेन कर्म्मणा"
इति भारते ।
"भुवं कोष्णेन कुण्डोध्नी मेध्येनावभृथादपि" ।
इति रघुवंशे ।)

अवभ्रटः, त्रि, (अवनतं नासिकायाः, नते नासिकायाः संज्ञायामिति भ्रटच् । अवभ्रटा नासिका अस्ति अस्य इति अर्श आद्यच् ।) नतनासिकव्यक्तिः । इत्यमरः ॥ खाँदा इति भाषा ।

अवमः, त्रि, (अवति अस्मात् आत्मानम्, अव रक्षणादौ, अवद्येति सूत्रेण अवतेः अमः प्रत्ययो निपातितः । अवो भवो वा, दवोधसोर्लोपश्चेति मः ।) अधमः । निन्दितः । इत्यमरः ॥
("अनलकानलकानवमां पुरीम्" । इति रघुवंशे ।)

अवमं, क्ली, तिथ्यन्तद्वयस्पृगेकदिनवारः । एकदिने एकतिथिर शेष अपरतिथिर आद्यन्तस्पर्श इति यावत् ॥ इति ज्योतिषशास्त्रे प्रसिद्धं ॥ यथा "तिथ्यन्तद्वयमेको दिनवारः स्पृशति यत्र तद्भवत्यवमदिनं । त्रिदिनस्पृक्तिथिरत्रयस्य स्पर्शनादह्नः" । इति ज्योतिषतत्त्वं ॥

अवमतं, त्रि, (अव + मन् + क्त ।) अवज्ञातं । अवमानितं । अनादृतं । इत्यमरः ॥
("सुखं ह्यवमतः शेते सुखञ्च प्रतिबुध्यते" ।
इति मनुः ।)

अवमतिः, पुं, (अवान्तरगता अमात्यादीनां कार्य्येषु मतिर्यस्य ।) स्वामी । ईश्वरः । पतिः । प्रभुः । नेता । इति जटाधरः ॥

अवमर्दः, पुं, (अव + मृद + घञ् ।) पीड़नं । मर्दनं । इत्यमरः ॥ शस्यादिसम्पन्नदेशस्य परचक्रेण पीड़नं । इति भरतः ॥
("बलावमर्दस्त्वयि सन्निविष्टो
यथा न गर्हेयुरुदारसत्त्वाः" ।
इति रामायणे ।) प्रभुकृतगाढ़प्रहार इति केचित् ॥ पदाक्रमणमिति केचित् ॥

अवमानः, पुं, (अव + मन् + भावे घञ् ।) अपमानः । अमर्य्यादा । यथा,—
"सम्मानाद्ब्राह्मणो नित्यमुद्विजेत विषादिव ।
अमृतस्येव चाकाङ्क्षेदवमानस्य सर्व्वदा" ॥
इति मानवे २ अध्याये १६२ श्लोकः ॥